## वृद्धादकेकान्तखोपधात्। (१४१/१३६५)

देशे इत्येव। वृद्धाद् देशवाचिनः अक इक इत्येवमन्तात् खकारोपधाच्च [1]प्रातिपदिकात् छः प्रत्ययो भवति शैषिकः। कोपधलक्षणस्या[2]णोऽपवादः। वाहीकग्रामलक्षणस्य च प्रत्ययस्य, 'रोपधेतोः प्राचाम्' (४.२.१२३/१३४७) इति च। [3]अकान्तात् तावत्–[4]आरीहणकीयम्। [5]द्रौघणकीयम्। [6]इकान्तात् – [7]आश्वपथिकीयम्। शाल्मलिकीयम्। खोपधात् – [8]कौटिशिखीयम्। आयोमुखीयम्।

[४४२] अकेकान्तग्रहणे कोपधग्रहणं[9] सौसुकाद्यर्थम्। (म. भा. २.३०१)

[10]सौसुकीयम्। [11]मौसुकीयम्। [12]ऐन्द्रवेणुकीयम्॥

## कन्थापलदनगरग्रामह्रदोत्तरपदात्। (१४२/१३६६)

देशे इत्येव, वृद्धात् इति च। कन्थाद्युत्तरपदाद् देशवाचिनो वृद्धात् प्रातिपदिकाच् छः प्रत्ययो भवति शैषिकः। वाहीक[13]ग्रामादिलक्षणस्य [14]प्रत्ययस्यापवादः। दाक्षिकन्थीयम्। माहिकिकन्थीयम्। दाक्षिपलदीयम्। माहिकिपलदीयम्। दाक्षिनगरीयम्। माहिकिनगरीयम्। दाक्षिग्रामीयम्। माहिकिग्रामीयम्। दाक्षिह्रदीयम्। माहिकिह्रदीयम्॥

## पर्वताच्च। (१४३/१३६७)

पर्वतशब्दाच् छः प्रत्ययो भवति शैषिकः। अणोऽपवादः। [15]पर्वतीयो राजा। पर्वतीयः [16]पुरुषः॥

## विभाषाऽमनुष्ये। (१४४/१३६८)

पर्वतशब्दाच् छः प्रत्ययो भवति वा अमनुष्ये [17]वाच्ये। पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। पर्वतीयानि फलानि, [18]पार्वतानि फलानि। पर्वतीयमुदकम्, [19]पार्वतमुदकम्[20]। अमनुष्ये इति किम्? पर्वतीयो मनुष्यः॥

## कृकणपर्णाद् भारद्वाजे। (१४५/१३६९)

देशे इत्येव। भारद्वाजशब्दोऽपि [21]देशवचन एव,[22] न गोत्रशब्दः। प्रकृतिविशेषणं चैतत्, न प्रत्ययार्थः। कृकणपर्णशब्दाभ्यां भारद्वाजदेशवाचिभ्यां छः प्रत्ययो भवति शैषिकः[23]। कृकणीयम्। पर्णीयम्। भारद्वाजे इति किम्? कार्कणम्[24]। पार्णम्॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ
चतुर्थाध्यायस्य द्वितीयः पादः॥

---

1. प्रातिपदिकात् नास्ति ड. 2. अञो क. इ. 3. अगन्तात् ब. 4. अरीकणकीयः इ. 5. द्रौपणकीयम् ब, द्राघणकीयम् ड, दौष्पणकीयम् इ 6. इगन्तात् ब. ड. 7. आश्वत्थिकीयम् ब. क. ड. इ. फ. 8. कोटिशिखीयम् ह. 9. कर्तव्यम् इत्यधिकम् क. 10. सौस्रुकीयम् क. 11. नास्ति ड, अवेडकीयम् ब. 12. ऐरण्डकीयम् इ. 13. ग्रामलक्षणस्य क. 14. प्रत्ययस्य नास्ति फ. 15. पर्वते भवः इत्यधिकम् ह, पार्वतीयः ह. इ. 16. पुमान् ह. फ. 17. अभिधेये ब. फ. ह, नास्ति इ. 18. पार्वतीयानि क. ह. 19. पार्वतीयम् क. 20. इति इत्यधिकम् ह. 21. देशवाची फ. 22. गृह्यते इत्यधिकम् फ. ह. 23. अणोऽपवादः इत्यधिकम् ब. क. ड. इ. फ. ह. 24. फलम् इत्यधिकम् ड.